प्रागिवीयाः– दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ५ । ३ । २७, पूर्वाधरावराणामसि पुरधवश्चैषाम् ५ । ३ । ३९, अस्ताति च ५ । ३ । ४०, विभाषा ऽवरस्य ५ । ३ । ४१, दक्षिणोत्तराभ्यामतसुच् ५ । ३ । २८, अञ्चेर्लुक् ५ । ३ । ३०, उपर्युपरिष्टात् ५ । ३ । ३१, पश्चात् ५ । ३ । ३२, संख्याया विधार्थे धा ५ । ३ । ४२, भूतपूर्वे चरट् ५ । ३ । ५३, अतिशायने तमबिष्ठनौ ५ । ३ । ५५, तिङश्च ५ । ३ । ५६, तरप्तमपौ घ : १ । १ । २२, किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ५ । ४ । ११, द्विवचनविभज्योपपदे तरबीयसुनौ ५ । ३ । ५७, प्रशस्यस्य श्रः ५ । ३ । ६०, प्रकृत्यैकाच् ६ । ४ । १६३, ज्य च ५ । ३ । ६१, ज्यादादीयसः ६ । ४ । १६०, वृद्धस्य च ५ । ३ । ६२, अन्तिकबाढयोर्नेदसाधौ ५ । ३ । ६३,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ६ । ४ । १५६, प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रबद्राधिवृन्दाः ६ । ४ । ६६, बहोर्लोपो भू च बहोः ६ । ४ । १५८, इष्ठस्य यिट् च ६ । ४ । १५९, प्रशंसायां रूपप् ५ । ३ । ६६, ईषदसमाप्तौ कल्पब्- देश्य- देशीयरः ५ । ३ । ६७, विभाषा सुपो बहुच्पुरस्तात्तु ५ । ३ । ६८, प्रागिवात्कः ५ । ३ । ७०, अव्ययसर्वनाम्नामकच् प्राक् टेः ५ । ३ । ७१, कुत्सिते ५ । ३ । ७४, अल्पे ५ । ३ । ८५, विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वा वाच्यः (वा.), किं यत्तदो निर्धारणे द्वयोरेकस्य डतरच् ५ । ३ । ९२, वा बहुनां जातिपरिप्रश्ने डतमच् ५ । ३ । ९३, एकाच्च प्राचाम् ५ । ३ । ९४ ।

स्वार्थिक प्रकरणम् – इवे प्रतिकृतौ ५ । ३ । ९६, सर्वप्रातिपदिकेभ्यः स्वार्थे कन् (वा.), शाखादिभ्यो यः ५ । ३ । १०३, कुशाग्राच्छः ५ । ३ । १०५, तत्प्रकृतवचने मयट् ५ । ४ । २१, संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् ५ । ४ । १७, द्वित्रिचतुर्भ्यः सुच् ५ । ४ । १८, एकस्य सकृच्च ५ । ४ । १९, पादार्घाभ्यां च ५ । ४ । २५, अतिथेर्ञ्य : ५ । ४ । २६, नवस्य नू आदेशः त्नप्तप्खाश्च वक्तव्या (वा.), भागरूपनामभ्यो धेयः (वा.), देवात्तल् ५ । ४ । २७, मृदस्तिकन् ५ । ४ । ३९, सस्नौ प्रशंसायाम् ५ । ४ । ४०, प्रज्ञादिभ्यश्च ५ । ४ । ३८, बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् ५ । ४ । ४२, संख्यैकवचनाच्च वीप्सायाम् ५ । ४ । ४३, कृभ्वस्तियोगे संपद्यकर्तरि च्विः ५ । ४ । ५०, अभूततद्भाव इति वक्तव्यम् (वा.), अस्य च्वौ ७ । ४ । ३२, अभिविधौ संपदा च ५ । ४ । ५३, अव्यक्तानुकरणाद् द्व्यजवरार्धादनितो डाच् ५ । ४ । ५७, डाचि बहुलं द्वे भवतः (वा.), नित्यमाम्रेडिते डाचीति वक्तव्यम् (वा.), संख्यायाश्च गुणान्तायाः ५ । ४ । ५९, समयाच्च यापनायाम् ५ । ४ । ६०, सुखप्रियादानुलोम्ये ५ । ४ । ६३, दुःखात् प्रातिलोम्ये ५ । ४ । ६४, शुलात् पाके ५ । ४ । ६५ मद्रात्परिवापणे ५ । ४ । ६७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्विरुक्तप्रकरणं सम्पूर्णम् ।

(ग) स्त्रीप्रत्ययप्रकरणम्– १०

स्त्रियाम् ४ । १ । ३, अजाद्यतष्टाप् ४ । १ । ४, शूद्रा चामहत् पूर्वा जाति : (वा.), उगितश्च ४ । १ । ६, वनो र च ४ । १ । ७, बहुव्रीहौ वा (वा.), पादो ऽन्यतरस्याम् ४ । १ । ८, टाबृचि ४ । १ । ९, मनः ४ । १ । ११, अनो बहुव्रीहेः ४ । १ । १२, डाबुभाभ्यामन्यतरस्याम् ४ । १ । १३, अन उपधालोपिनो ऽन्यतरस्याम् ४ । १ । २८, प्रत्ययस्थात्कात् पूर्वस्यात इदाप्यसुपः ७ । ३ । ४४, टिड्ढाणञ्-द्वयसज्-दघ्नञ्-मात्रच् तयप्-ठक्-ठञ्-कञ्-क्वरपः ४ । १ । १५, वयसि प्रथमे ४ । १ । २०, ऊधसोऽनङ ५ । ४ । १३, बहुव्रीहेरुधसोङीप् ४ । १ । २५ पत्युर्नो यज्ञसंयोगे ४ । १ । ३, विभाषा सपूर्वस्य ४ । १ । ३४, नित्यं सपत्न्यादिषु ४ । १ । ३५, षिद्गौरादिभ्यश्च ४ । १ । ४१, मत्स्यस्य ङ्याम् (वा.), वोतो गुणवचनात् ४ । १ । ४४, बह्वादिभ्यश्च ४ । १ । ४५, कृतिकारादक्तिनः (वा.), पुंयोगादाख्यायाम् ४ । १ । ४८,पालकान्तान्न (वा.), सूर्याद्दिवतायां चाप (वा.), इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवन मातुलाचार्याणामानुक् ४ । १ । ४९, हिमारण्यर्महत्त्वे (वा.), यवनाल्लिप्याम् (वा.), मातुलोपाध्याययोरानुग्वा (वा.), स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ४ । १ । ५४, अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथा युतम् ॥ (कारिका) । सख्यशिश्वीति भाषायाम् ४ । १ । ६२, जातेरस्त्री विषयादयोपधात् ४ । १ । ६३, आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह ॥ (कारिका) । इतो मनुष्यजातेः ४ । १ । ६५, ऊङुतः ४ । १ । ६६, ऊरूत्तरपदादौपम्ये ४ । १ । ६९, संहितशफलक्षणवामादेश्च ४ । १ । ७०, नृनरयोर्वृद्धिश्च (वा.), यूनस्तिः ४ । १ । ७७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यपुस्तकम्–

१. **मध्यसिद्धान्तकौमुदी** वरदराजकृता, (केवलसमासतः स्त्रीप्रत्ययान्ता) चौखम्बा संस्कृत सिरिज, वाराणसी ।

शिक्षणपद्धतिः

१. पाठ्यविषयोपस्थापनं स्तरानुकूल्या सरलया पद्धत्या करणीयम् ।
२. श्यामपट्टस्य प्रयोगोऽनिवार्यतया रूपसिद्धिप्रक्रियाशिक्षणे करणीयः ।
३. प्रश्नोत्तरमाध्यमेन कक्षायां छात्रान् सक्रियान् विधाय विषयोस्थापनमावश्यकम् ।
४. रूपसिद्धिप्रक्रियालेखने छात्रा : प्रोत्साहनीया : न तु रटने ।
५. शिक्षकेण निदर्शनरूपेण कक्षायां रूपसिद्धिप्रक्रियालेखनाभ्यासः कारयितव्यः ।
६. गृहकार्यरूपेण रूपसिद्धिप्रक्रियाया लेखनाभ्यासस्य परीक्षणं कर्तव्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनिवार्यन्यायः
(व्याकरणच्छात्राणां कृते)

उद्देश्यम्-

न्यायशास्त्राभिमतपदार्थानां सामान्यतो ज्ञानम् ।

प्रथमं पत्रम्- **पूर्णाङ्का : १००**

प्रकरण-विभाजनम्-

(क)	मङ्गलवादादिः	१०	पूर्णाङ्काः
(ख)	पदार्थोद्देशः	१०	१००
(ग)	साधर्म्यवैधर्म्ये	३०	
(घ)	पृथिवीजलतेजसां निरूपणम्	३०	
(ङ)	वाय्वाकाशदिशां निरूपणम्	२०	

प्रकरणम्-

(क) **मङ्गलवादादिः-** १०

कारिकावलीमङ्गलम्, मुक्तावलीमङ्गलम्, तत्र समाप्तपुनरात्तत्वदोषनिराकरणम्, अनुबन्धचतुष्टयम्, मङ्गलवादः, ईश्वरसिद्धिश्चेति ।

(ख) **पदार्थोद्देशः-** १०

द्रव्यादिपदार्थोद्देशः, शक्तिसादृश्ययोरनतिरिक्तपदार्थत्वम्, द्रव्यविभागः, द्रव्यत्वजातिसिद्धिः, तमसो दशमद्रव्यत्वाभावः,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणकर्मणोरवान्तरविभागः, सामान्यविशेषसमवायाभावानां निरूपणञ्चेति ।

(ग) **साधर्म्यवैधर्म्ये-** ३०

सप्तपदार्थानां साधर्म्यवैधर्म्ये, तत्र क्रमश उत्तरोत्तरवर्तिष्वेकैकं विहाय पञ्चानां चतुर्णां त्रयाणां द्वयोश्च साधर्म्यवैधर्म्ये, गुणादिसाधर्म्यम्, सामान्यादिसाधर्म्यम्, प्रसङ्गात् कारणत्वनिर्वचनम्, तत्त्रैविध्यप्रतिपादनम्, अन्यथासिद्धिनिरूपणं, नित्यद्रव्यातिरिक्तानां साधर्म्यम् ततो द्रव्यमात्रस्य, मूर्तद्रव्याणां, व्यापकद्रव्याणां, स्पर्शवताम्, आकाशशरीरिणोः, पृथिव्यादित्रयाणाम्, पृथिवीतेजसोः, विशेषगुणवताञ्च साधर्म्यवैधर्म्ये द्रव्यविशेषे गुणाविशेषस्थितिश्चेति ।

(घ) **पृथिवीजलतेजसां निरूपणम्-** ३०

पृथिवीलक्षणम्, पृथिवीत्वजातिसिद्धिः, पाषाणस्य गन्धवत्त्वम्, पृथिव्यामेव षड्विधो रस इति निरूपणम्, गुणान्तराणामपि तत्रास्तित्वप्रतिपादनम्, नित्यानित्यपृथिवीविभागः, अवयविसिद्धिः, परमाणुसिद्धिः, शरीरेन्द्रियविषयनिर्देशः, जलनिरूपणम् तत्र रसस्पर्शवर्णानां वर्णनम्, जललक्षणम्, जलत्वजातिसिद्धिः, पूर्ववन्नित्यानित्यत्वविवेके ऽपि शरीरेन्द्रियविषयाणां विशेष इति कथनम्, तेजोलक्षणादिकम्, जल इवात्राप्यतिदेशः सुवर्णस्य तैजसत्वञ्चेति

(ङ) **वाय्वाकाशदिशां निरूपणम्-** २०

वायोर्लक्षणम्, वायुत्वजातिः, स्पर्शानुमेयता, इन्द्रियं त्वक्, प्राणादिमहावायु-पर्यन्तमस्य विषयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दाश्रयत्वेन आकाशे प्रमाणसूचनम्, आकाशस्यैकत्वेऽपि उपाधिभेदाच्छ्रोत्रेन्द्रियाणामनेकत्वम्, कालस्य जन्याधारतानिरूपणम्, उपाधिभेदात्कालानेकत्वप्रतीतिः, दैशिकपरत्वापरत्व-निमित्तत्वेन दिशः साधनम्, तस्या एकत्वेऽपि प्राच्यादिव्यपदेश उपाधिनिबन्धन इति निरूपणञ्चेति ।

पाठ्यग्रन्थः-

१. **न्यायसिद्धान्तमुक्तावली** (आदितो दिङ्निरूपणान्ता) ।

सहायकग्रन्थौ-

१. **मुक्तावल्याः** किरणावलीटीका ।

२. **तर्कभाषा** केशवमिश्रकृता ।

शिक्षणविधिः

१. विषयोपयोगित्वप्रतिपादनम् ।

२. संक्षेपेण विषयवस्तुनिरूपणम् ।

३. प्रकरणानां सङ्गतिबोधावश्यकत्वप्रतिपादनम् ।

४. अधीतविषयाणां प्रश्नोत्तरमाध्यमेन स्थैर्यसम्पादनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. लेखाभ्यासवृद्धये लघुविषयेषु लेखनकला-शिक्षणम् ।

६. कठिनशब्दानां पृथगर्थबोधनम् ।

७. श्यामपट्टादौ शब्दार्थं विलिख्य पठनसौकर्याधानञ्च ।

निदर्शनप्रश्नपत्रम्

उत्तरमध्यमपरीक्षा

(व्याकरणच्छात्राणां कृते)

खण्डः- प्रथमः पूर्णाङ्काः : १००

विषयः- अनिवार्य न्यायः । समयः- घण्टात्रयम्

पत्रम्- प्रथमम्

१. मुक्तावल्या मङ्गलं विलिख्य तत्र को दोषः कथं निरस्तो भवतीति विलिख्यताम् । १०

अथवा

अनुमानेनेश्वरं प्रसाध्य तदनुमाने सत्प्रतिपक्षः कथं न भवतीति विचार्यताम् ।

२. पदार्थभेदं निर्दिश्य सामान्यभेदा जातिबाधकाश्च परिगण्यन्ताम् । १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा

तममो दशमद्रव्यत्वनिरासो विधीयताम् ।

३. अणुपरिमाणं कुत्रेति विलिख्य तस्याकारणत्वं सम्यक् प्रतिपाद्यताम् । २०

अथवा

अव्याप्यवृत्तिविशेषगुणवत्त्वं केषां साधर्म्यम् ? तच्च तत्र कथमिति भण्यताम् ।

४. पृथिवीलक्षणमुल्लिख्य पाषाणानां गन्धवत्त्वं प्रसाध्यताम् । २०

अथवा

सुवर्णस्य तैजसत्वे युक्तिः प्रदर्श्यताम् ।

५. वायोः कतिगुणाः ? के च ते ? १०

६. परमाणुसिद्धौ का युक्तिः प्रदर्शिता ग्रन्थकृतेति प्रदर्श्यताम् । १०

७. वायुसाधकानुमानं कीदृशमिति निदर्श्यताम् । १०

८. दिश एकत्वात् प्राच्यादिव्यवहारः कथं भवतीति निरूप्यताम् । १०

अथवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालोपाधिर्विविच्यताम् ।

द्वितीयं पत्रम्- **पूर्णाङ्का: ५०**

१.	आत्मनिरूपणम्	१५	पूर्णाङ्का:
२.	बुद्धिनिरूपणम्	२०	५०
३.	सन्निकर्ष:	१५	

प्रकरणम्-

(क) आत्मनिरूपणम्- १५

आत्मत्वजातिसाधनम्, आत्मानुमानम्, शरीरेन्द्रियमनसामात्मत्वाभाव:, क्षणिकविज्ञानस्य नित्यविज्ञानस्य चात्मत्वखण्डनम्, आत्मनि प्रमाणम्, आत्मसम्बन्धिसांख्यमतखण्डनम्, परात्मानुमानविधिश्चेति ।

(ख) बुद्धिनिरूपणम्- २०

आत्मनो बुद्ध्यादिगुणवत्त्वकथनम्, सामान्यतो बुद्धिभेद:, प्रत्यक्षानुमित्युपमितिशाब्दभेदेनानुभूतेश्चातुर्विध्यम्, प्रत्यक्षादिलक्षणानि, प्रत्यक्षभेदास्तेषां विषयाश्च, त्वङ्मनोयोगस्य ज्ञानसामान्ये कारणत्वविचार:, मनोग्राह्यविषयकथनम्, निर्विकल्पकज्ञानम्, प्रत्यक्षे महत्त्वं हेतु:, करणमिन्द्रियमिति निरूपणञ्चेति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) सन्निकर्षः- १५

लौकिकव्यापाराणां षड्विधत्वम्, विषयभेदेन प्रत्यासत्तिभेदाः, अभावप्रत्यक्षे योग्यानुपलब्धेः कारणता, सामान्यलक्षणज्ञानलक्षणयोगजभेदेनालौकिसन्निकर्षस्य त्रैविध्यम्, सामान्यलक्षणज्ञानलक्षणयोः पार्थक्ये हेतुः योगजसन्निकर्षस्य द्वैविध्यञ्चेति ।

पाठ्यग्रन्थः-

१. **न्यायसिद्धान्तमुक्तावली** (प्रत्यक्षखण्डस्य आत्मनिरूपणात्प्रत्यक्षखडान्तो भागः) ।

सहायकग्रन्थः-

१. **तर्कसङ्ग्रहस्तस्य** पदकृत्यटीका च ।

शिक्षणविधिः

१. प्रथमखण्डे ऽधीतस्येतः प्राक्तनग्रन्थभागस्यानेनभागेनसम्बन्धस्थापनम् ।

२. कठिनशब्दानां विवरणकरणम् ।

३. व्याकरणाध्ययने ऽस्योपयोगित्वदर्शनम् ।

४. न्यायपदार्थानां समासेन बोधाधानम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. शास्त्रिस्तराधारभूतयोग्यता-सम्पादनम् ।

६. उपर्युक्त-विषयाधानाय लेखनशैलीवर्धनम् ।

७. सद्यउत्तरापेक्षिप्रश्नमाध्यमेनाधीतविषयाणामयातयामत्वस्थितीकरणञ्चेति ।

निदर्शनप्रश्नपत्रम्

उत्तरमध्यमपरीक्षा

खण्डः- द्वितीयः **पूर्णाङ्का : ५०**
विषयः- अनिवार्यन्यायः **समयः- सार्धैकघण्टा**
(व्याकरणच्छात्राणां कृते)
द्वितीयं पत्रम्

१. आत्मत्वजातिसाधनं विधीयताम् । १०

अथवा

क्षणिकविज्ञानात्मवादिनः के ? तस्यात्मत्वे का हानिरिति निरूप्यताम् ।

२. परात्मा कथमनुमीयते ? ५

३. इन्द्रियलक्षणं सपदकृत्यमुल्लिख्यताम् । २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा

त्वङ्मनोयोगस्य ज्ञानसामान्यकारणत्वं व्यवस्थाप्यताम् ।

४. लौकिकसन्निकर्षः कतिविध इति नामतो निर्दिश्यताम् । १०

अथवा

का नाम योग्यानुपलब्धिः ? कस्य प्रत्यक्षे सा कारणमिति निगद्यताम् ।

५. योगजसन्निकर्षः कतिविध इति सनामग्राहं प्रदर्श्यताम् । ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनिवार्यसंस्कृतरचना

स्तरगतविषयशिक्षणस्योद्देश्यम्-

अस्य पाठ्यांशस्याध्ययेनेनच्छात्रा निम्नविषयेषु क्षमा भविष्यन्ति-

१- वाक्याधारभूतानां नामपदानां लिङ्गव्यवस्थाया ज्ञाने ।

२- सुबन्ततिङन्तपदानां रूपावबोधे ।

३- संस्कृतवाक्यरचनायाम् ।

४- अभिव्यक्तिप्रकाराणां प्रयोगे ।

५- सरलसंस्कृतनिबद्धग्रन्थानां स्वयमेवाध्ययने शब्दानां व्युत्पादने च

प्रथमं पत्रम्- **पूर्णाङ्का : १००**

संस्कृतरचना ।

प्रकरणविभागः

प्रकरणनाम	पाठ्यांशाः	अङ्काः	पूर्णाङ्काः
(क)	नामलिङ्गव्यवस्था रूपावलिश्च	-२०	१००
(ख)	वाक्यरचना	-२०	
(ग)	वाक्यपरिवर्तनम्	-२०	
(घ)	अभिव्यक्तिस्तत्प्रकाराश्च	-२०	
(ङ)	बोधो व्युत्पत्तिश्च	-२०	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकरणम्–

(क) **नामलिङ्गव्यवस्था रूपावलिश्च–** २०

तत्र वाक्याधारभूतानां सुबन्तपदानां लिङ्गव्यवस्थावबोधाय निम्नसूत्राणां सापवादानां सोदाहरणमध्ययनम् ।

(अ)

(१) **स्त्र्यधिकारे –**

(१) ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः (२) अन्यूप्रत्ययान्तो धातुः
(३) मिन्यन्तः (४) क्तिन्नन्तः
(५) ईकारान्तश्च (६) ऊङाबन्तश्च
(७) य्वन्तमेकाक्षरम् (८) विंशत्यादिरा नवतेः
(९) तलन्तः
(१०) भाःस्रुक्-स्रग्दिगुष्णिगुपानहः ।

(२) **पुमधिकारे –**

(१) घञबन्तः (२) घाजन्तश्च
(३) भयलिङ्गभगपदानि नपुंसके (४) नङन्तः
(५) क्यन्तो घुः (६) त्रिविष्टपत्रिभुवने नपुंसके
(७) द्यौः स्त्रियाम् (८) क्रतुपुरुषकपोल-गुल्फमेघाभिधानानि
(९) अभ्रं नपुंसकम् (१०) उकारान्तः
(११) धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् (१२) रुत्वन्त :
(१३) दारुकशेरुजतुवस्तुमस्तूनि नपुंसके च (१४) कोपधः
(१५) चिबुकादीनि नपुंसके (१६) टोपधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१७) किरीटादीनि नपुंसके च (१८) णोपधः
(१९) ऋणलवणपर्णतोरणोष्णानि नपुंसके (२०) थोपधः
(२१) नोपधः (२२) जघनादीनि नपुंसके
(२३) पोपधः (२४) पापादीनि नपुंसके
(२५) मोपधः (२६) संग्रामादीनि नपुंसके च
(२७) योपधः (२८) किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके
(२९) गोमयकषायमलयान्वयाव्ययानि नपुंसके च
(३०) रोपधः (३१) द्वारादीनि नपुंसके
(३२) षोपधः (३३) शिरीषादीनि नपुंसके
(३४) सोपधः (३५) पनसबिसबुससाहसानि नपुंसके
(३६) चमसादीनि नपुंसके च (३७) रश्मिदिवाभिधानानि
(३८) मानाभिधानानि (३९) खारीमानिके स्त्रियाम्
(४०) दाराक्षतलाजासूनां बहुत्वं च ।

(३) **नपुंसकाधिकारे -**

(१) भावे ल्युडन्तः (२) निष्ठा च
(३) त्वष्यञौ तद्धितौ (४) यद्यढग्यगञण्वुञ्छाश्च
(५) द्वन्द्वैकत्वम्
(६) मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधा-नानि
(७) शतादिःसंख्या (८) असन्तो द्व्यच्कः
(९) त्रन्नन्तः ।

(४) **अवशिष्टलिङ्गे -**

(१) अव्ययं कतियुष्मदस्मदः (२) ष्णान्ता संख्या
(३) गुणवचनम् (४) कृत्याश्च
(५) करणाधिकरणयोर्ल्युट् च (६) सर्वादीनि सर्वनामानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(आ) **रूपावली** -

(१) सुबन्तेषु अजन्तानां- कृष्ण-फल-सर्व-प्रथम-द्वितीयान्यतरकतमरमाहरिसखि-द्वि-दधि-त्रि-सुधी-नदी-स्त्री-सानु-भानु-भू-नृ-धातृ-पितृ-मातृ-गो-नौशब्दानां तत्तुल्यानाञ्चान्येषां शब्दानां रूपाणां ज्ञानम् ।

(२) हलन्तानां- वणिज्- भवत्-यावत्-गच्छत्-ब्रह्मन्-सीमन्-कर्मन्-राजन्-युवन्-पथिन्-अहन्-पञ्चन्-अष्टन्-दण्डिन्-अप्-गिर्-दिश्-दिव्-षष्-चतुर्-वेधस्-विद्वस्-मनस्-युष्मदस्मद्-किम्-तदेतदिदमदस्-यच्छब्दानां तत्तुल्यानामन्येषाञ्च शब्दानां रूपाणां बोधः ।

(३) ण्यन्त-सन्नन्तसहितानां-भू-वृधु-हन्-शीङ्-दृ-दा-दिवु-जनी-तुद-रुध-कृ-क्री-धातूनां रूपाणां ज्ञानम् (वाक्यरचनायामत्यपेक्षितानां लट्-लृट्-लोट्-लङ्-लिङ्लुङ्लकारेषु निष्पन्नानां तेषां विशेषेणाभ्यासः) ।

(ख) **संस्कृतवाक्यरचना** - २०

वाक्यपरिचयः, वाक्यावयवाः, वाक्यभेदाः, ससम्बन्धकारकनियमानुसारेण वाक्यरचनाभ्यासः, अनुच्छेदलेखनाभ्यास : ।

(ग) **वाक्यपरिवर्तनम्** - २०

(१) वचनपुरुषकालानुसारेण वाक्यानां मिथः परिवर्तनम् ।

(२) वाच्यपरिवर्तनम् ।

(३) रचनादृष्ट्या वाक्यानां परस्परं परिवर्तनम् ।

(४) अर्थानुसारेण वाक्यानां मिथः परिवर्तनम् ।

(५) वाक्यसंश्लेषणम् ।

(६) वाक्यविश्लेषणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) विस्तृतस्यांशस्य संक्षेपेण संक्षिप्तस्य च विस्तरेण लेखनम् ।

(घ) **अभिव्यक्तिस्तत्प्रकाराश्च** - २०

अभिव्यक्तिपदस्यार्थः, अभिव्यक्तेः प्रकाराः, तेषु निम्नलिखिताभिव्यक्ति-प्रकाराणामभ्यासः -

(क) **निबन्धरचना** - निबन्धस्य लक्षणम्, निबन्धस्य प्रकाराः, निबन्धावयवा :, निबन्ध-लेखनविधिः, निबन्धरचनाभ्यासः ।

(ख) **संवादः**- संवादस्य परिचयः, संवादलेखनविधिः, संवादलेखनाभ्यासः ।

(ग) **वादविवादः**- वादविवादस्य स्वरूपम्, तत्र विचारणीया विषयाः, वादविवादलेखनाभ्यासः ।

(घ) **मनोवादः**- मनोवादस्य परिचयः, संवादमनोवादयोः पार्थक्यम्, मनोवादलेखनाभ्यासः।

(ङ) **समीक्षा**- समीक्षायाः परिचयः, समीक्षायाः प्रकाराः, समीक्षायां विचारणीया विषयाः, निम्नकृतीनामध्ययनं विधाय समीक्षणस्याभ्यासः-

(१) **कथायां**- पञ्चतन्त्रमित्रभेदस्यादितः पञ्चकथाः ।

(२) **नाटके**- स्वप्नवासवदत्तम्-भासप्रणीतम् ।

(३) **कवितायां**- नीतिशतकम्-भर्तृहरिप्रणीतम् ।

(ङ) **बोधो व्युत्पत्तिश्च**- २०

(१) पञ्चतन्त्रान्तर्गतानां मित्रभेदस्थितानां सपद्यानामादितः पञ्चकथानां विग्रह-प्रकृतिप्रत्ययविभाग-पर्यायभावार्थप्रदर्शनपूर्वकं व्याख्यानम् ।

२) संस्कृत-भाषावबोधशक्तेरभिवृद्धयेऽ दृष्टांशानामपि प्रश्नोत्तरविग्रहपर्यायभावार्थप्रदर्शनाभ्यासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यपुस्तकानि-

(१) **मध्यसिद्धान्तकौमुदी** (लिङ्गानुशासनम्) ।
(२) **स्वप्नवासवदत्तम्-** भासप्रणीतम् ।
(३) **नीतिशतकम्** भर्तृहरिप्रणीतम् ।
(४) **पञ्चतन्त्रम्-** विष्णुशर्मप्रणीतम् (आदितः पञ्चकथाः) ।

सहायकपुस्तकानि-

(१) **अनुवादचन्द्रिका** - पं. सोमनाथसिग्द्याल: ।
(२) **रूपचन्द्रिका** - रमेशचन्द्रशुक्ल: ।
(३) **संस्कृतशिक्षणाभ्यासः (प्रथमो भागः)** - नीलमणिढुङ्गाना ।
(४) **प्रबन्धरत्नाकर** : डा. रमेशचन्द्रशुक्लः ।
(५) **निबन्धनवनीतम्** - पारसनाथप्रणीतम् ।

शिक्षणविधिः

(१) लिङ्गानुशासनशिक्षणे रूपावलीनाञ्च शिक्षणं विधेयम् ।
(२) वाक्यरचनाशिक्षणक्रमे कारकीयसूत्राणामप्युल्लेखः कार्यः ।
(३) सर्वत्र निगमनागमन-प्रश्नोत्तर-व्याख्याविधिनामुपयोगो भवति समुचितः ।

निदर्शनप्रश्नपत्रम्

उत्तरमध्यमपरीक्षा

खण्डः- प्रथमः **पूर्णाङ्काः १००**
विषयः- अनिवार्यसंस्कृतरचना **समयः- घण्टात्रयम्**
पत्रम्- प्रथमम्

(१) अशनि-बहु-किम्-राजन्-कर्मन्-मातृ-पङ्क्ति-लवण-पनस-दारशब्दानां लिङ्गनिर्देशं कुरुत । ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) भ्रातृ-नदी-यत्नोपाधि-पङ्कशब्दानां लिङ्गानुशासनसूत्राणि लिखत । ५

अथवा

निम्नसूत्राणां सोदाहरणमर्थं प्रकाशयत ।

अन्यूप्रत्ययान्तो धातुः । क्तिन्नन्तः । भावे ल्युडन्तः । शतादिःसंख्या । घञवन्तः ।

(३) कृष्ण-रमा-सर्व-युवन्-राजन्शब्दानां चतुर्थ्येकवचने रूपाणि विलिख्य वाक्येषु प्रयोगं कुरुत । ५

(४) भू-हन्-भी-लभ्-नश्धातूनां लङि मध्यमपुरुषस्यैकवचने रूपाणि निर्दिश्य वाक्यानि रचयत । ५

(५) कोष्ठानुसारेण रिक्तस्थानं प्रपूर्य कारकीयविभक्तिविधायकसूत्राणि च निर्दिशत । १०

(क) आवाम्....................जिघ्राव: (कमल, पुष्प)

(ख) बाला:..................... अधिशेरते (शय्या)

(ग) याचका:....................द्रव्यं याचन्ते (धनिन्)

(घ) भटा:.....................विजित्य पारितोषिकं लभन्ते (शत्रु)

(ङ) त्वं.................सह गृहमगच्छः (तत्-स्त्री, बहुवचन)

(च) असौ................. क्रुध्यति (अस्मद्-द्विवचन)

(छ) गाव:................. बिभ्यति (सिंह-बहुवचन)

(ज) राम:................. चतुरो वर्तते (बाल)

(झ) छात्रा:.............. विद्यालयं यान्ति (अध्ययन)

(ञ) ....सवितरि तारका अदृश्यन्त (अस्तं यात)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(६) वाक्येषु प्रयोगं कुरुत । ५

अन्तरा । नमः । त्रायसे । परितः । दुग्धः ।

(७) अशुद्धीः सयुक्ति संशोधयत । ५

मया पाठं पठामि । देव पूज्यन्ताम् । कृष्णो देवाय भजते । रामौ सिंहेनः त्रस्यतः । तव मम श्रद्धा नास्ति ।

(८) वाच्यपरिवर्तनं कुरुत । ५

(क) रामः सुन्दरो ऽस्ति ।

(ख) याचकाः प्रतिगृहं भ्रमन्तो द्रव्यमयाचन्त ।

(ग) मया पक्वानि फलानि खादितानि ।

(घ) बालकैः फलेषु खाद्यमानेषु वानरा अकुप्यन्त ।

(ङ) गोपालो गां पयो धोक्ष्यति ।

अथवा

कर्मवाच्यस्य प्रयोगं विधाय दशभिर्वाक्यैर्हिमालयं वर्णयत ।

(९) कोष्ठस्थसङ्केतमनुसृत्य वाक्यपरिवर्तनं कुरुत । ५

(क) रामः पाठं पठिष्यति (आज्ञार्थके)

(ख) त्वं गृहं यास्यसि (भूतकाले)

(ग) त्वयाऽहं पाठ्ये (कर्तृवाच्ये)

(घ) स मां पाठयति (प्रश्नार्थे)

(ङ) महाकवयः काव्यान्यरचयन् (भविष्यति)

(च) वयं कार्याणि कुर्मः (प्रेरणार्थके)

(छ) मृगः सिंहाद् बिभेति (बहुवचने)

(ज) त्वं कुत्र गच्छसि (प्रथमपुरुषे)

(झ) यः पठति स समुत्तीर्णो भवति (संयुक्ते)

(ञ) परीक्षायां त्वं सफलो भवसि (विध्यर्थे)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथवा

कोष्ठानुसारेण निम्नप्रश्नानामुत्तराणि लिखत ।

(क) मशकैः के अदश्यन्त (युष्मद्)

(ख) पुत्र : कमनुयाति (पितृ)

(ग) अनुजौ केन सह क्रीडतः (भ्रातृ)

(घ) मूर्खः कस्मै द्रुह्यति (तत् सज्जन)

(ङ) वनं कस्माद् दक्षिणा वर्तते ? (नगर)

(च) बालकाः केभ्योऽन्तर्दधते ? (गुरु)

(छ) कस्योपरि हिमं विलसति ? (हिमवत्)

(ज) तारकाःकुत्राद्योतन्त ? (नभस्)

(झ) कस्मिन् सति तमो नश्यति ? (उदित, सूर्य)

(ञ) कीदृशश्चौरो व्याघ्रेण खादितः (परा-अय्)

१०. निम्नसूक्तेराशयं विस्तारयत । ५

महान् महत्स्वेव करोति विक्रमम् ।

११. क्त्वा-तुमुन्-शतृप्रत्ययान्तैः पदैर्योजयित्वा प्रत्येकं त्रीणि वाक्यानि रचयत । १०

(क) वयं फलानि खादामः । वयं वाटिकां यास्यामः ।

(ख) ते हरेश्चरित्रं गायन्ति । ते सुन्दरं नृत्यन्ति ।

(ग) अनुजौ मन्दिरं प्रविशतः । तौ शिवं नमतः ।

(घ) भ्रातरो विद्यालयं गच्छन्तु । ते पाठं पठन्तु ।

(ङ) वृक्षेषु फलानि पक्वानि सन्ति । तानि भूमौ पतन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१२. कमप्येकं विषयमवलम्ब्य निबन्धं रचयत । १५

(क) अस्माकं विद्यालयः ।

(ख) हिमालयो नाम नगाधिराजः ।

(ग) संस्कृतभाषा ।

अथवा

स्वप्नवासवदत्तस्य वैशिष्ट्यं प्रकाशयत ।

अथवा

विष्णुशर्मणः परिचयं प्रस्तूय निम्नपद्यस्याशयं स्फुटीकुरुत ।

षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णः स्थिरो भवेत् ।
तस्मात्सर्वप्रयत्नेन षट्कर्णं वर्जयेत् सुधीः ॥

अथवा

प्रसङ्गच्छन्दोविग्रहप्रदर्शनपुरःसरमधस्तनपद्यं व्याख्यायताम् ।

परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैर्विपणन्ति गोपा : ॥

१३. कमप्येकं विषयमवलम्ब्य स्वल्पं मनोवादं रचयत । ५

१४. निम्नप्रश्नानामुत्तराणि लिखत । ५

(क) नयशास्त्रप्रवर्तकाः के सन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) कीदृशा नरा यौवने ऽपि वृद्धा दृश्यन्ते ?

(ग) धनस्य प्रभाव: कीदृशो ऽस्ति ?

(घ) कीदृशस्य नरस्य जीवितेन प्रयोजनं न विद्यते ?

(ङ) राजान: पन्नगाश्च कीदृशा भवन्ति ?

अथवा

निम्नलिखितगद्यभागमधीत्य तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत।

अथ कदाचित् पिङ्गलको नाम सिंह: सर्वमृगपरिवृत: पिपासाकुल: उदकपानार्थं यमुनातटमवतीर्ण: सञ्जीवकस्य गम्भीरारावं दूरादेवाशृणोत्। तच्छ्रुत्वा ऽतीव व्याकुलहृदय: ससाध्वसमाकारं प्रच्छाद्य वटतले चतुर्मण्डलावस्थानेनावस्थित: । चतुर्मण्डलावस्थानन्त्वित्थम्- सिंहा:, सिंहानुयायिन:, काकरवा:, किंवृत्ता इति। अथ तस्य करटकदमकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनावास्ताम्।

(१) कथंभूतेन सिंहेन सञ्जीवकस्यारावो ऽश्रूयत ?

(२) सिंह: किमर्थं व्याकुल:, कथञ्चावस्थित: ?

(३) करटकदमकयो: परिचय: क: ?

(४) चतुर्मण्डलावस्थानस्य को ऽभिप्राय: ?

(५) सिंह: किमर्थं यमुनाकच्छं यात: ?

अथवा

उपरितनगद्यभागान्तर्गतपदानां केवलं पर्यायशब्दान् लिखत।

(१५) विग्रहं प्रदर्श्य समासनामानि च लिखत। ५

सर्वमृगपरिवृत: । पिपासाकुल: । यमुनातटम् । ससाध्वसम् । भ्रष्टाधिकारौ ।

(१६) प्रकृतिप्रत्ययविच्छेदं विधाय सूत्राणि च निर्दिशत। ५

अवतीर्ण : । श्रुत्वा । अवस्थानम् । स्थित: । प्रच्छाद्य । अनुयायी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपाल परिचय

स्तरगत विषयशिक्षणको उद्देश्य -

नेपालको वस्तुस्थिति विशेषत:- भौगोलिक, ऐतिहासिक, सांस्कृतिक, आर्थिक एवं राजनैतिक पक्ष तथा आधुनिकीकरणका प्रक्रियाहरूको जानकारी संक्षिप्त रूपमा दिनु नेपाल-परिचय विषयक पाठ्यक्रमको मूल उद्देश्य रहेको छ ।

प्रथम पत्र - **पूर्णाङ्क -५०**

नेपाल परिचय

प्रकरण -

१. **भौगोलिक स्थिति ।**

(क) विश्वमानचित्रमा नेपाल ।

(ख) भौगोलिक विभाजन -

१. **धरातल** - हिमाल, पहाड, तराई ।

२. **नदी** - गण्डकी, कर्णाली, कोशी ।

३. **हावापानी** - उष्ण, समशीतोष्ण, शीत ।

(ग) **प्रशासनिक विभाजन -**

प्रशासनिक क्षेत्र - अंचल, जिल्ला ।

२. **राजनीतिक इतिहास -**

१. नेपाल शब्दको उत्पत्ति ।

२. प्राग्-ऐतिहासिक काल ।

३. प्राचीन नेपाल (गोपाल, महिषपाल, किरात र लिच्छविकाल) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. **मध्यकाल** (क) त्रिशक्तिको उदय, (डोय, डस र मल्ल) (ख) बाइसी, चौबीसी, पूर्वतर्फको सेन तथा उपत्यकाका मल्ल राज्यहरूको ऐतिहासिक परिचय ।

५. **आधुनिक काल-**

(क) नेपालको एकीकरण (पृथ्वीनारायण शाह, राजेन्द्रलक्ष्मी, बहादुर शाह) ।

(ख) राजनैतिक स्थिति र राणाशासन ।

(ग) २००७ सालको क्रान्ति र त्यसपछिको एक दशक ।

(घ) पंचायती व्यवस्थाको उदय, विकास र विशेषता ।

३. **सामाजिक जीवन**

जाति, भाषा, धर्म, पेसा, रहन-सहन र चाडपर्व ।

४. **आर्थिक जीवन**

(क) **आर्थिक समस्याका महत्त्वपूर्ण पक्षहरू -**

१. कृषिव्यवस्था र भूमिसुधार
२. औद्योगिक विकास
३. व्यापार विविधीकरण
४. मिश्रित व्यवस्था
५. साझा
६. योजनाबद्ध विकास ।

(ख) **साधन र स्रोत** - मानवशक्ति, जलस्रोत, भूमि, वनसम्पदा र खनिजस्रोत ।

५. **परराष्ट्र नीति**

(क) नेपालको परराष्ट्र नीतिका विशेषताहरू (ख) नेपाल-भारत सम्बन्ध

(ग) नेपाल-भोट -चीन सम्बन्ध (घ) असंलग्न परराष्ट्र नीति र शान्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

६. **शासन व्यवस्था**

(क) कार्यपालिका (ख) व्यवस्थापिका (ग) न्यायपालिका ।

७. **भाषा र साहित्य**

संस्कृत, नेपाली, मैथिली र नेवारी भाषा तथा साहित्यको सामान्य परिचय ।

८. **ललित कला**

(क) चित्रकला (ख) मूर्तिकला (ग) वास्तुकला ।

प्रश्न–पत्रसम्बन्धमा : प्रश्न-पत्र तयार गर्दा दुई दुई समूहमा विभाजन गर्ने ।

(क) समूहमा चारवटा निबन्धात्मक प्रश्नहरू सोधिनेछन् । तीमध्ये कुनै दुईवटाको उत्तर दिनुपर्ने छ र अंकभार प्रत्येक प्रश्नको १६ हुनेछ ।

(ख) समूहमा पाँचवटा प्रश्न सोधिनेछन् र तीमध्ये तीनवटाको उत्तर संक्षिप्तात्मक किसिमले दिनुपर्नेछ । अंकभार प्रत्येक प्रश्नको ६ हुनेछ ।

नोट : प्रश्नहरू सोद्धा हरेक यूनिटहरूबाट कम्तीमा पनि एउटा प्रश्न समावेश हुनुपर्नेछ र निबन्धात्मक प्रश्नहरू सोधिएका यूनिटहरूबाट संक्षिप्तात्मक प्रश्नहरू सोधिनेछैनन् । एउटा यूनिटबाट दुईवटा निबन्धात्मक प्रश्न पनि रहनेछैनन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुक्लयजुर्वेद :

स्तरगतविषयशिक्षणोद्देश्यम्-

१. नित्यनैमित्तिक-वैदिककर्मसंस्कारयोस्तत्रप्रयोक्तव्यमन्त्राणां छन्दोदेवतादिज्ञानोत्पादनम् ।

२. स्मार्तकर्मणि विहित-कुण्डमण्डपादिनिर्माणसामर्थ्योत्पादनम् ।

३. उपनयनविवाहसंस्कारमुहूर्तादिज्ञानोत्पादनम् ।

प्रथमं पत्रम्- **पूर्णाङ्का : १००**

मन्त्रसंस्कारकुण्डादिज्ञापकम्।

प्रकरणम्-

(क) चयनयागमन्त्राः शतरुद्रीयमन्त्राश्च
(शु.य.वे.संहितायाः सस्वराया : १३-१६ अध्यायाः)- ३५

(ख) चयनशेषमन्त्रा : सौत्रामणिमन्त्राश्च
(शु.य.वे.सं हितायाः सस्वराया : १७-२० अध्यायाः)- ३५

(ग) कुण्डमण्डपनिर्माणविधि :
(दिक्साधन-मण्डपसाधन-पताकाध्वजनिवेशन-कुण्डनिर्माण-मेखलाविरचनानि)- ३०

पाठ्यग्रन्थौ-

१. शुक्लयजुर्वेदसंहिता (१३-२० अध्यायान्ता) । २. कुण्डमण्डपसिद्धौ-निम्नाङ्किता अंशाः-

(क) ग्रन्थकर्तृपरिचय : (ख) हस्तादिमानानि (ग) पृथ्वीपरीक्षा (घ) दिक्साधनम् (ङ) चतुष्कोणसाधनम् (च) मण्डपनिर्माणप्रकारः (छ) ध्वजारोपणप्रकारः (ज) नवकुण्डपक्षः (झ) पञ्चकुण्डीपक्षः (ञ) नवकुण्डफलानि (ट) हवनसंख्याहस्तादिमानम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ठ) कुण्डेषु योनिनिवेशनप्रकार: (ड) चतुरस्रकुण्डसाधनम् (ढ) वृत्तकुण्डसाधनम् (ण) मेखलारचनप्रकार: (त) स्थण्डिलवेदिप्रमाणम् ।

सहायकग्रन्थौ –

१. काण्वसंहिता २. कुण्डार्कः ।

द्वितीयं पत्रम्- **पूर्णाङ्का : १००**

मन्त्रसंस्कारच्छन्दोज्ञापकम् ।

प्रकरणम्-

(क)	सौत्रामण्यश्वमेधादिमन्त्रा: (शु.य.वे.संहिताया:सस्वराया: २१-२५ अध्याया:) -	३५
(ख)	खिलहोतृप्रेषसौत्रामणिशेषमन्त्रा: (शु.य.वे.संहिताया : सस्वराया : २६-३० अध्याया:) -	३५
(ग)	गायत्र्यादिवैदिकच्छन्दांसि -	१५
(घ)	गर्भाधानादिकेशान्तसंस्कारमुहूर्ता:-	१५

पाठ्यग्रन्था :

१. **शुक्लयजुर्वेदसंहितायाः** २१-३० अध्याया : ।

२. **पिङ्गलच्छन्द** : सूत्रस्य चतुर्थाध्यायान्तो भाग : ।

३. **मुहूर्तचिन्तामणौ** – निम्नाङ्किता अंशा :-

(क) तिथीशज्ञानम् (ख) तिथीनां नन्दादिसंज्ञा: (ग) नक्षत्रस्वामिन: (घ) नक्षत्रवासराणां ध्रुवादिसंज्ञा: (ङ) संस्कारप्रकरणे च-

१. प्रथमरजोदर्शने शुभाशुभविचार: (१-३ पद्यानि) २. रजस्वलास्नानमुहूर्त : गर्भाधानपुंसवनसीमन्तोन्नयनमुहूर्ताश्च ३. जातकर्मनामकरणमुहूर्त: (११पद्यम्) ४. प्रथमदन्तोद्गमनफलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१३ पद्यम्), ५. अन्नप्राशनमुहूर्त : तल्लग्नशुद्धिश्च (१७,१८ पद्ये) ६. अन्नप्राशने शुभाशुभफलम् ७. कर्णवेधमुहूर्त : तल्लग्नशुद्धिश्च ८. गुरुशुक्रबाल्यास्तवार्धक्यकृत्याकृत्यविवेक : (२६-२८ पद्यानि) ९. चुडामुहूर्त : १०. अक्षरारम्भादि केशान्तसंस्कारमुहूर्ता:।

तृतीयं-पत्रम् - **पूर्णाङ्क : १००**

पुरुषमेधमन्त्र-संस्कारमुहूर्तज्ञापकम्।

(क) पुरुषमेध- सर्वमेधपितृमेधादिमन्त्रा:
(शुक्लयजुर्वेदसंहिताया : ३१-३५ अध्याया :)- ३५

(ख) शान्तिकमन्त्रा :, धर्मनिर्माणादिसौमिकशेषमन्त्रा: ईशोपनिषन्मन्त्राश्च
(शु.य.वे.संहिताया: सस्वराया : ३६-४० अध्याया :) - ३५

(ग) विवाहलग्न-मुहूर्तादि: - १०

(घ) चूडोपनयविवाहपद्धतय: - २०

पाठ्यग्रन्था:-

१. **शुक्लयजुर्वेदसंहिताया : ३१-४० अध्याया :।**

२. **मुहूर्तचिन्तामणौ** विवाहप्रकरणे निम्नाङ्किता अंशा: -
(क) वैधव्ययोग: (ख) प्रथमापत्यविषयकविचार: (ग) प्रश्नलग्नक्षणविचार: (घ) कन्यावरणमुहूर्त: (ङ) विवाहे वरवध्वोर्जन्मराशितो ग्रहशुद्धिप्रकार: (च) विवाहमासादि:, (१३-१८ पद्यानि) (छ) वरवध्वोर्वर्णाद्यष्टकूटज्ञानम् (२१-२६ पद्यानि) (ज) विवाहनक्षत्राणि (झ) आद्यगर्भ-द्विज्येष्ठत्रिज्येष्ठ, सहजादिविवाहे विशेषज्ञानम् (ञ) चूडाविवाहादौ पौर्वापर्यविचार: (ट) मूलादिनक्षत्रजातयोर्वरवध्वो: श्वश्र्वादिपीडाविचार: (ठ) लता-कर्तारीदोषौ तत्परिहारश्च ।

३. **प्रचलिताश्चूडोपनयनविवाहपद्धतय:।**

सहायकग्रन्था:-

१. **काण्वसंहिता । २. संस्कारभास्कर :। ३. मुहूर्तमार्तण्ड :।**

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नव्यव्याकरणम्

स्तरगतविषयशिक्षणोद्देश्यम् -

पाणिनीयव्याकरणरीत्या लौकिकसंस्कृतशब्दानां

साधुत्वव्युत्पादनम् । एतावता - व्याकरणोत्तरमध्यमोत्तीर्णाश्छात्रा :

सन्धि-सुबन्त-स्त्रीप्रत्ययान्त-तद्धितान्त-तिङन्तशब्दानां व्युत्पादने, प्रयोगे विभक्त्यर्थज्ञाने च समर्था भविष्यन्ति ।

प्रथमं पत्रम् - **पूर्णाङ्का : १००**

संज्ञादिकारकान्तम् ।

प्रकरणम् -

(क)	संज्ञासन्धिप्रकरणम् (आदितः स्वादिसन्ध्यन्तम्) -	२०
(ख)	सुबन्तप्रकरणम् (अजन्तपुँल्लिङ्गादव्ययान्तम्) -	४०
(ग)	स्त्रीप्रत्ययप्रकरणम् (सम्पूर्णम्) -	२०
(घ)	कारकप्रकरणम् (सम्पूर्णम्) -	२०

पाठ्यग्रन्थः-

वैयाकरण-सिद्धान्तकौमुदी (आदितःकारकान्ता) ।

द्वितीयं पत्रम् - **पूर्णाङ्का : १००**

समासादिद्विरुक्तान्तम् ।

प्रकरणम् -

(क)	समासप्रकरणम् (अव्ययीभावादिसमासाश्रयान्तम्) -	४०
(ख)	अपत्याधिकारादिचातुरर्थिकप्रकरणान्तम् -	२०
(ग)	शैषिकादिद्विरुक्तप्रकरणान्तम् (शेषे इति सूत्रात् नञ्स्नञधिकारान्तम्)-	४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यग्रन्थः-

वैयाकरणसिद्धान्तकौमुदी (समर्थानां प्रथमाद्वेत्यतो द्विरुक्तान्ता) ।

तृतीयं पत्रम् - **पूर्णाङ्का : १००**

भ्वादित : सन्नन्तान्तम् ।

प्रकरणम् -

(क) भ्वादितो जुहोत्याद्यन्तम् - ४०

(ख) दिवादित : क्र्याद्यन्तम् - ३०

(ग) चुरादितो णिजन्तान्तम् - २०

(घ) सन्नन्तप्रकरणम् - १०

पाठ्यग्रन्थः-

वैयाकरणसिद्धान्तकौमुदी (भ्वादित : सन्नन्तान्ता) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्यौतिषम्

स्तरगतविषयशिक्षणोद्देश्यम् -

१. आवश्यकानां ज्यौतिषसम्बन्धिकार्याणां निष्पादनम् ।

२. व्यवहारोपयोगिपञ्चाङ्गनिर्माणे तदुपयोगे च सामर्थ्योत्पादनम् ।

३. गोलसम्बन्धिसाधारणविषयाणां क्षेत्रात्परिचयप्रदानसामर्थ्यम् ।

४. साधारणजन्मपत्रिकानिर्माणपूर्वकं तदाधारे शुभाशुभफलकथनम् ।

५. रेखागणितस्य निर्धारितसिद्धान्तानां स्थापनं तथा प्रतिपादनम् ।

६. ज्यौतिषशास्त्रसम्बद्धानां व्यवहारोपयोगिविषयाणां संस्कारादीनाञ्च कृते शुभमुहूर्तप्रदानम् ।

प्रथमं पत्रम् - **पूर्णाङ्का : १००**

रेखागणितं मुहूर्तशास्त्रञ्च ।

प्रकरणम् -

(क) क्षेत्रमितिः (रेखागणितस्य प्रथमद्वितीयाध्यायान्तर्गतसिद्धान्तानां प्रतिपादनम्)- ३०

(ख) मुहूर्तज्ञानम् (मुहूर्तचिन्तामणेः संक्रान्ति-गोचर-संस्कार-विवाहप्रकरणानामधोलिखितविषया :) - २५

१. संक्रान्तिप्रकरणम् ।

२. गोचरप्रकरणम् ।

३. संस्कारप्रकरणे -

(i) प्रथमरजोदर्शने मासनक्षत्रतिथ्यादीनां शुभाशुभत्वम् (१-३ पद्यानि) (ii) प्रथमरजस्वलायाःस्नानमुहूर्तः (४ पद्यम्) (iii) जातकर्मनामकरणयोर्मुहूर्तः (११ पद्यम्) (iv) प्रथमदन्तोत्पत्तिफलम् (१३पद्यम्) (v) अन्नप्राशनमुहूर्तः तत्कृते लग्नशुद्धिश्च (१७, १८ पद्ये) (vi) अन्नप्राशनलग्नानुसारेण शुभाशुभफलकथनम् (१९,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२० पद्ये) (vii) कर्णवेधमुहूर्तस्तत्र लग्नशुद्धिश्च (२४,२५ पद्ये) (viii) गुरुशुक्रयोर्बाल्यवार्धक्यास्तादौ वर्ज्यकर्माणि हेयदिनानि च (२६-२८ पद्यानि) (ix) चूडाक्षरविद्यारम्भव्रतबन्धसंस्काराणां लग्ननवमांशशुद्धिपूर्वकम् शुभाशुभमुहूर्तज्ञानं तत्फलं च (२९-५३ पद्यानि) (x) उपनयेऽनध्यायास्तिथयः (५४ पद्यम्) (xi) केशान्तसमावर्तनयोर्मुहूर्त :(६० पद्यम्) ।

४. **विवाहप्रकरणे -**

(i) बालवैधव्यादिदोषपरिहारः (७ पद्यम्) (ii) कन्यावरवरणमुहूर्तस्तथा वरवध्वोर्विवाहे जन्मराशितो ग्रहशुद्धिप्रकारश्च (१०-१२ पद्यानि) (iii) विवाहविहितमासाः, विवाहार्थं विविधधर्मशास्त्रीयवचनानि च (१३-१८ पद्यानि) (iv) वरवध्वोर्वर्णाद्यष्टकूटानां मेलनप्रकारः (२१-३६ पद्यानि) (v) विवाहे ग्राह्यनक्षत्राणि, पञ्चसप्तशलाकाचक्रे क्रूराक्रान्तनक्षत्रदोषपरिहारश्च (५३-५६ पद्यानि) (vi) लग्ननवमांशवशाद् वरवध्वोः शुभाशुभत्वं संक्रान्तौ वर्ज्यघटिकाश्च (७४-७८ पद्यानि) (vii) विवाहे नवमांशलग्नवशाच्छुभाशुभत्वम् (८२-८९ पद्यानि) (viii) विवाहदिनात् पूर्वमावश्यकानां दलन-वण्डन-गृहाङ्गणविभूषणादिकर्मणां मुहूर्तदानम् (९४-९५ पद्ये (ix) विवाहे लग्नेष्टकालसाधनप्रकार : (१०२-१०४ पद्यानि) ।

(ग) **जातकशास्त्रम् -** २५

(घ) **क्रियात्मकमध्ययनम्**

(सामान्यजन्मपत्रिकानिर्माणां, लग्नपत्रिकासाधनञ्च)- २०

(i) पञ्चाङ्गाधारे भयातभभोगसाधनम् (ii) ग्रहाणां स्पष्टीकरणम् (iii) प्रथमलग्नसाधनम् (iv) भुक्तोन-योगिनी-विंशोत्तरी-दशासाधनम् (v) त्रिभागी-दशासाधनम् (vi) जन्मकुण्डली-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

राशिकुण्डली-साधनम् (vii) विवाह-व्रतबन्धयोर्लग्नपत्रिकानिर्माणम् ।

पाठ्यग्रन्था:-

१. **रेखागणितम्** (१-२ अध्यायौ)-सम्पादक :- सीतारामझा ।

२. **मुहूर्तचिन्तामणि**:- रामदैवज्ञ: ।

३. **लघुजातकम्**-वराहमिहिराचार्य : ।

सहायकग्रन्था:-

१. **नवीन-रेखागणितम् ।**

२. **ज्योति:सारशिरोमणि: ।**

३. **जन्मपत्रदीपक: ।**

४. **नेपालदेशीयं पञ्चाङ्गम् ।**

द्वितीयं पत्रम्- पूर्णाङ्क : १००

रेखागणितं फलशास्त्रञ्च ।

प्रकरणम् -

(क) क्षेत्रमिति: (रेखागणितस्य तृतीयचतुर्थाध्यायान्तर्गतसिद्धान्तानां प्रतिपादनम्) - ३०

(ख) मुहूर्तज्ञानम् (मुहूर्तचिन्तामणेर्वधूप्रवेश-द्विरागमनाग्न्याधान राजाभिषेकयात्रा-वास्तुगृहप्रवेश-प्रकरणानामधोनिर्दिष्टा विषया :) - ३०

१. वधूप्रवेशप्रकरणम् ।

२. द्विरागमनप्रकरणम् ।

३. अग्न्याधानप्रकरणम् ।

४. राजाभिषेकप्रकरणम् ।

५. यात्राप्रकरणे -

(i) यात्राकालस्तन्मुहूर्तश्च (८,९ पद्ये) (ii) वारनक्षत्रशूलम् (१०पद्यम्) (iii) नक्षत्रवशात् कालशूलपरिज्ञानम् (११ पद्यम्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(iv) सर्वाङ्कज्ञानम् (२४ पद्यम्) (v) घातचन्द्र-घाततिथि-घातवार-घातनक्षत्र-योगिनीनां ज्ञानप्रकार : (२७-३१ पद्यानि) (vi) कालपाशयोगौ (३२ पद्यम्) (vii) सम्मुखशुक्रदोषस्तत्परिहारश्च (३७-३९ पद्यानि) (viii) यात्रायां त्याज्यलग्नं. नौकायानञ्च (४०-४३ पद्यानि (ix) यात्रायां लग्नशुद्धि : (५३पद्यम्) (x) यात्रायां विजयादशम्या वैशिष्ट्यम् (७४ पद्यम्) (xi) यात्रायां चित्तशुद्धिस्तथा व्रतबन्धेन देवताप्रतिष्ठादितो गमनवर्ज्यदिनानि च (७५-७६ पद्ये) (xii) त्रिनवमीदोष : (७९ पद्यम्) (xiii) नक्षत्रदिग्वार-तिथि-दोहदज्ञानम् (८१-८५ पद्यानि) (xiv) गमनविलम्बे वर्गक्रमेण प्रास्थानिकवस्तुनिरूपणम् (८९ पद्यम्) (xv) शुभाशंसना: (९७-१०४ पद्यानि) (xvi) अपशकुनेतिकर्तव्यतानिरूपणम् ।

६. **वास्तुप्रकरणे** -

(i) गृहारम्भे सूर्य-चन्द्र-गुरु-शुक्राणामस्तादिवशात्तत्तदशुभ-फलनिर्देशनम् (६पद्यम्) (ii) सफलवृषवास्तुचक्रम् (१३-१४ पद्ये) (iii) गृहारम्भे मासशुचिप्रकार : (१६ पद्यम्) (iv) गृहारम्भे पञ्चाङ्गशुद्धिस्तथा खातारम्भे राहुमुखपुच्छादिज्ञानम् (१८-१९ पद्ये) (v) गृहनिर्माणलग्नस्थितिग्रहवशाद् गृहस्यालक्ष्म्यादि-युक्तत्वपरिज्ञानम् (२४ पद्यम्) (vi) नक्षत्रवारादिवशाद् गृहस्य धनधान्यादिप्रदायकत्वम् (२६ पद्यम्) ।

७. **गृहप्रवेशप्रकरणम्**–

(ग) **लघुपाराशरी (पाराशरीयं जातकशास्त्रम्)** - १०

(घ) **षट्पञ्चाशिका (प्रश्नफलात्मकं ज्यौतिषम्)** - १०

(ङ) **क्रियात्मकमध्ययनम्** - २०

(i) ससन्धि-द्वादशभावसाधनम् (ii) आयुर्दाय -साधनम् ।

(iii) भाव-नवमांश-द्वादशांश-होरा-द्रेष्काण- त्रिंशदशाष्ट-वर्गकुण्डलीनिर्माणम् ।

पाठ्यग्रन्था :-

१. **रेखागणितम्** (३-४ अध्यायौ) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. **मुहूर्तचिन्तामणि** :- राम-दैवज्ञ :।

३. **लघुपाराशरी** -पराशराचार्य :।

४. **षट्पञ्चाशिका** -पृथुयश : ।

तृतीयं पत्रम् - **पूर्णाङ्का : १००**

करणशास्त्रं गोलपरिभाषा च।

प्रकरणम् -

(क) ग्रहलाघवं करणम् (ग्रहलाघवस्य आदितः सूर्यग्रहणान्तो भागः) -

(अ)	आदितःपञ्चतारास्पष्टीकरणान्तम् -	२५
(आ)	त्रिप्रश्नाधिकार : -	१५
(इ)	चन्द्रसूर्यग्रहणाधिकारौ -	२०
(ख)	गोलपरिभाषा (गोलीय-पदार्थानां क्षेत्रगतं निदर्शनम्)-	२०
(ग)	क्रियात्मकमध्ययनम् -	२०

(अ) पञ्चाङ्गानां (तिथि-वार-नक्षत्र-योग-करणानां साधनम्) ।

(आ) संक्रान्तिसाधनम् ।

पाठ्यग्रन्थाः-

१. **ग्रहलाघवं करणम्** - गणेशदैवज्ञः ।

२. **सौरार्य-ब्राह्मपक्षीय-तिथिगणितम्** - केतकरः ।

३. **गोलपरिभाषा** - नीलाम्बरः ।

सहायकग्रन्थाः-

१. **भास्वती** - शतानन्दः ।

२. **वैजयन्ती नाम पञ्चाङ्गगणितम्** - केतकर :।

३. **गोलबोधः** - नयराजपन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्यायः

स्तरगतविषयशिक्षणोद्देश्यम्-

नैयायिकोक्तपूर्वोत्तरव्याप्तिस्वरूपयोः पूर्वोत्तर-मीमांसा-साङ्ख्ययोग-विषयकसिद्धान्तानाञ्चावगमः ।

प्रथमं पत्रम्- **पूर्णाङ्काः १००**

न्यायवेदान्तमीमांसापरिचयः।

प्रकरणम्-

(क) व्याप्तिपूर्वपक्षप्रथम-द्वितीय-लक्षणपरिष्कारः-	२०
(ख) व्याप्तिपूर्वपक्षतृतीयादिपञ्चम-लक्षणपरिष्कारः-	२०
(ग) वेदान्तसिद्धान्तपरिचयः-	३०
(घ) पूर्वमीमांसासिद्धान्तपरिचयः-	३०

पाठ्यग्रन्थाः-

१. **व्याप्तिपञ्चकमाथुरी** (सम्पूर्णा) ।
२. **वेदान्तसार** : सदानन्दकृत : ।
३. **अर्थसंग्रह** : लौगाक्षिभास्करप्रणीतः ।

द्वितीयं पत्रम्- **पूर्णाङ्काः १००**

सिद्धान्तव्याप्तियोगसिद्धान्तपरिचयः।

प्रकरणम्-

(क) व्याप्तिसिद्धान्तलक्षणविचारः (अभावान्तार्थनिष्कर्षपर्यन्तो भागः) -	४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) व्याप्तिसिद्धान्तलक्षणविचारः
(तदवशिष्टो भागः) - ३०

(ग) योगसिद्धान्तपरिचयः- ३०

पाठ्यग्रन्थौ-

१. सिद्धान्तलक्षणजागदीशी ।

२. योगसूत्रम् (पदचन्द्रिकोपेतम्) ।

तृतीयं पत्रम्- पूर्णाङ्काः १००

अवच्छेदकत्वनिर्वचनम् तथा सांख्यसिद्धान्तपरिचयः ।

प्रकरणम्-

(क) अवच्छेदकत्वविवेक : (प्रथमलक्षणम्)- २५

(ख) अवच्छेदकत्वविवेक : (अवशिष्टभाग :)- २५

(ग) साङ्ख्यशास्त्रप्रयोजन-प्रमाणविचारः- २०

(घ) साङ्ख्यप्रमेयविचारः- ३०

पाठ्यग्रन्थौ-

१. अवच्छेदकत्वनिरुक्तिजागदीशी ।

२. साङ्ख्यतत्त्वकौमुदी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

साहित्यम्

स्तरगतविषयशिक्षणोद्देश्यम् -

(क) पद्यरचनाभ्यासवर्धनार्थं छन्दसामावश्यकज्ञानोपार्जनम् ।

(ख) साहित्यविषयपरिशीलनोपयोगितर्कशास्त्रज्ञानार्जनम् ।

(ग) कालिदासादीनां काव्यरचनाध्ययनमाध्यमेन रचनाकौशलसंवर्धनमार्यसंस्कृते : परिचयार्जनञ्च ।

प्रथमं पत्रम् - **पूर्णाङ्का : १००**

गद्यपद्यकाव्याध्ययनम्।

प्रकरणम्-

(क)	दशकुमारचरिताध्ययनम् -	५०
(ख)	रघुवंशाध्ययनम् -	२०
(ग)	किरातार्जुनीयाध्ययनम् -	३०

पाठ्यग्रन्था:-

१. दण्डिरचितदशकुमारचरितम् (पूर्वपीठिकाया १-५ उच्छ्वासा:) ।

२. महाकविकालिदासकृतं रघुवंशमहाकाव्यम् (१३-१४ सर्गौ) ।

३. भारविरचितं किरातार्जुनीयम् महाकाव्यम् (३-५ सर्गा:) ।

द्वितीयं पत्रम् - **पूर्णाङ्का : १००**

नाटकानुशीलनं गद्यकाव्याध्ययनं च ।

प्रकरणम् -

(क)	नागानन्दाध्ययनम् -	४०
(ख)	सुन्दरचरिताध्ययनम् -	३०
(ग)	शिवराजविजयाध्ययनम् -	३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पाठ्यग्रन्थाः -

१. **नागानन्दम्** - हर्षवर्धनप्रणीतम् (सम्पूर्णम्) ।

२. **सुन्दरचरितम्** (१-४ अङ्काः) छविलालसूरिरचितम् ।

३. **शिवराजविजय** : (प्रथमविरामस्य ३-४ निःश्वासौ) ।

सहायकग्रन्थः -

१. **संस्कृतसाहित्येतिहास** : रामचन्द्रमिश्रप्रणीत : ।

तृतीयं पत्रम् - **पूर्णाङ्का : १००**

तर्कच्छन्दः साहित्यशास्त्राध्ययनम् ।

'क' समूह :

प्रकरणम् -

(क)	द्रव्यादिपदार्थाध्ययनम् -	२०
(ख)	प्रत्यक्षानुमानप्रमाणाध्ययनम् -	२०
(ग)	उपमानशब्दप्रमाणाध्ययनम् -	१०

पाठ्यग्रन्थः-

(१) **तर्कसंग्रह** : (न्यायबोधिनीपदकृत्यसहित :) ।

'ख' समूह :

प्रकरणम्-

(क)	शास्त्रनिर्देश : काव्यपुरुषोत्पत्तिविषयकमध्ययनम् -	१५
(ख)	शिष्यप्रतिभाव्युत्पत्तिकविस्वरूपविषयकमध्ययनम् -	१५
(ग)	छन्दसामध्ययनम् -	२०

सगणयतिविरामादिनियमज्ञानं 'ग' प्रकरणे अधस्तनानां छन्दसां लक्षणोदाहरणानि ..

१. शशिवदना २. विद्युन्माला ३. विद्युल्लेखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. प्रमाणिका	५. मत्ता	६. त्वरितगतिः
७. इन्द्रवज्रा	८. उपेन्द्रवज्रा	९. उपजातिः
१०. शालिनी	११. रथोद्धता	१२. स्वागता
१३. दोधकम्	१४. इन्दिरा	१५. वंशस्थम्
१६. इन्द्रवंशा	१७. जलोद्धतगतिः	१८. भुजङ्गप्रयातम्
१९. तोटकम्	२०. स्रग्विणी	२१. प्रमिताक्षरा
२२. द्रुतविलम्बितम्	२३. कुसुमविचित्रा	२४. मत्तमयूरम्
२५. प्रहर्षिणी	२६. वसन्ततिलका	२७. मालिनी
२८. पञ्चचामरम्	२९. शिखरिणी	३०. पृथ्वी
३१. मन्दाक्रान्ता	३२. हरिणी	३३. शार्दूलविक्रीडितम्
३४. सुवदना	३५. स्रग्धरा	३६. कुसुमस्तबकदण्डकः
३७. हरिणप्लुता	३८. अपरवक्त्रम्	३९. पुष्पिताग्रा
४०. सुन्दरी	४१. वक्त्रम्	४२. पथ्या
४३. आर्या	४४. गद्यभेदा :	

पाठ्यग्रन्थौ –

१. **राजशेखरकृता काव्यमीमांसा** (१-५अध्यायाः)।

२. **गङ्गादासकृता छन्दोमञ्जरी** (निर्दिष्टांशयुता)।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतिहास-पुराणम्

स्तरगतशिक्षणोद्देश्यम्-

१. पशुपतेः पाशुपतक्षेत्रस्य च धार्मिकैतिहासिकविषयकज्ञानोपार्जनम् ।

२. विष्णुमहिमज्ञानसम्पादनं सृष्टिस्वरूपज्ञानसम्पादनं च ।

३. संक्षेपतो रामचरितपूर्वकाणां रामायणकाव्योपक्रमादिविषयाणां रामलक्ष्मणयोः पराक्रमसम्बद्धानां चरितानां च ज्ञानम् ।

४. प्राचीनाभिलेखज्ञानम् ।

५. भीष्म-द्रोण - युधिष्ठिरादिचरितज्ञानसम्पादनं

धौम्यर्षेरारुण्यादिशिष्याणामादर्शचरितज्ञानं वर्णधर्मादिविषयकज्ञानोपार्जनञ्च ।

६. गण्डकी (चक्रनदी) महिमज्ञानसम्पादनम् ।

७. भूगोल-खगोलविषयकज्ञानार्जनम् ।

८. नेपालस्य प्राचीनेतिहासज्ञानप्राप्ति : ।

प्रथमं पत्रम् - **पूर्णाङ्का : १००**

विष्णु-नेपाल-गण्डकीमाहात्म्यम् ।

प्रकरणम् -

(क) मृगस्थल्यादिवर्णनम् - २५

(ख) विष्णुमहिमादिवर्णनम् - ३०

(ग) श्रीरामचरितादिवर्णनम् - ३०

(घ) गण्डकीमाहात्म्यवर्णनम् - १५

पाठ्यग्रन्थाः-

१. **नेपालमाहात्म्यम्** (१-१० अध्यायाः) ।

२. **विष्णुपुराणस्य प्रथमांश :** सम्पूर्ण :।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३. **वाल्मीकिरामायणस्य** बालकाण्डे १-११ सर्गाः ।

४. **गण्डकीगौरवम्** (सम्पूर्णम्)-उमानाथपन्थी ।

सहायकपुस्तकानि -

१. **रूरूवृत्तम्** - डा.टीकारामपन्थी ।

२. **पौराणिक आख्यान** - गङ्गासागर राय ।

३. **भानुभक्तरामायण** - बालकाण्ड ।

४. **रामायणदर्पण** - स्वामी ब्रह्ममुनिजी ।

द्वितीयं पत्रम् - पूर्णाङ्का : १००

श्रीरामचरितम् महाभारतस्यादिपर्वस्थविविधोपाख्यानञ्च ।

प्रकरणम् -

(क)	**हरिणेश्वरा** (पशुपति) **दिवर्णनम्** -	३०
(ख)	रामायणकथा (दशरथयागो रामादिजन्म च) -	३०
(ग)	महाभारतीयकथा -	४०

पाठ्यग्रन्थाः-

१. **नेपालमाहात्म्यम्** (१६-२० अध्यायाः) ।

२. **वाल्मीकिरामायणस्य** बालकाण्डे (१२-२० सर्गाः ।

३. **महाभारतस्यादिपर्वणि** १-२० अध्यायाः ।

तृतीयं पत्रम् - पूर्णाङ्का : १००

पौराणिकभूगोल-खगोलवर्णनं नेपालस्य

प्राचीनेतिहासोऽभिलेखश्च ।

प्रकरणम्-

(क)	भूगोलखगोलवर्णनम् -	३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) नेपालस्य प्राचीनेतिहास: - २५

(ग) रामलक्ष्मणयोर्विश्वामित्रेण सह मुन्याश्रमगमनं ताडकावधादिकञ्च - ३०

(घ) अभिलेखविषय: - १५

पाठ्यग्रन्था:-

१. **विष्णुपुराणस्य द्वितीयोंश:** सम्पूर्ण: ।

२. **वाल्मीकिरामायणस्य** बालकाण्डे २१-३० सर्गा: ।

३. **नेपालको ऐतिहासिक रूपरेखा** - बालचन्द्र शर्मा ।

४. **नेपालको आलोचनात्मक इतिहास** - प्रो.ढुण्डिराज भण्डारी ।

५. **चाँगुनारायणस्याभिलेख :** पाठ्याभिलेखा : ।

सहायकपुस्तकानि -

१. **लिच्छविकालका अभिलेख** -धनवज्र बज्राचार्य ।

२. **संक्षिप्तमहाभारतम्**-गीताप्रेस गोरखपुर ।

३. **संक्षिप्त महाभारत** नेपाली अनुवाद (कुनै पनि पुस्तकको सम्बद्ध अंश) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बौद्धदर्शनम्

स्तरगतविषयशिक्षणस्योद्देश्यम्-

१. बौद्धदर्शनपदार्थपरिचयप्रदानम् ।

२. बौद्धदर्शनस्य विशेषतो महायानसम्प्रदायसिद्धान्तस्य सामान्यज्ञानप्रदानम् ।

३. पालिभाषालिखितबौद्धग्रन्थाध्ययनसामर्थ्योत्पादनम् ।

प्रथमं पत्रम् - **पूर्णाङ्काः १००**

बौद्धदर्शनपारिभाषिकशब्दार्थपरिचयः।

प्रकरणम्-

क) निम्नाङ्कितानां पारिभाषिकशब्दार्थपरिचयः- ३०

१. त्रीणि रत्नानि	२. त्रीणि यानानि
३. पञ्चबुद्धाः	४. चतस्रो देव्यः
५. पञ्चरक्षाः	६. सप्त तथागताः
७. चत्वारो लोकपालाः	८. अष्टौ लोकपालाः
९. दशलोकपालाः	१०. चतुर्दश लोकपालाः
११. दशक्रोधाः	१२. अष्टौ बोधिसत्वाः
१३. षड् योगिन्यः	१४. सप्तविधाउत्तरपूजाः
१५. त्रीणि कुशलमूलानि	१६. चत्वारो ब्रह्मविहाराः
१७. षट् पारमिताः	१८. दशपारमिताः
१९. चत्वारि संग्रहवस्तुनि	२०. पञ्चाभिज्ञाः
२१. चत्वार्यार्यसत्यानि	२२. पञ्चस्कन्धाः

२३. लोकोत्तरपञ्चस्कन्धाश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) निम्नाङ्कितानांपारिभाषिकशब्दार्थपरिचयः- २०

१. द्वादशायतनानि
२. अष्टादश धातवः
३. एकादश रूपस्कन्धाः
४. त्रिविधा वेदनाः
५. संज्ञास्कन्धाः
६. द्विविधाः संस्काराः
७. चित्तसंप्रयुक्तसंस्काराश्चत्वारिंशत्
८. त्रयोदश चित्तविप्रयुक्तसंस्काराः
९. सप्तत्रिंशत् बोधिपाक्षिकधर्माः ।

(ग) निम्नाङ्कितानांपारिभाषिकशब्दार्थपरिचयः- २०

१. चतस्रः प्रतिसंविदः
२. चतस्रो धारिण्यः
३. चत्वारि प्रतिशरणानि
४. षडनुस्मृतयः
५. चत्वारि धर्मपदानि
६. दशाकुशलानि
७. षट् गतयः
८. षट् धावव:
९. अष्टौ विमोक्षाः
१०. पञ्चानन्तर्याणि
११. अष्टौ लोकधर्माः
१२. नवाङ्गप्रवचनानि
१३. दशभूमयः
१४. पञ्च चक्षूंषि
१५. षट् क्लेशाः
१६. पञ्च दृष्टयः
१७. चतुर्विंशतिरूपक्लेशाः
१८. पञ्चाहाराः
१९. पञ्च भयानि
२०. चत्वारि ध्यानानि ।

(घ) प्रत्यक्षप्रमाण-स्वार्थानुमानविचारः ३०

पाठ्यग्रन्थौ-

१. **धर्मसंग्रहः** (संबद्धांशः) नागार्जुनरचितः ।
२. **तर्कभाषा** (प्रत्यक्षस्वार्थानुमान-परिच्छेदौ) मोक्षाकरगुप्तविरचिता ।

सहायकग्रन्थः-

१. **बौद्धधर्मदर्शनम्**- आचार्यनरेन्द्रदेवप्रणीतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीयं पत्रम् - **पूर्णाङ्का : १००**

कोषावदानम् ।

प्रकरणम्-

(क)	धातुनिर्देशः-	३०
(ख)	इन्द्रियनिर्देशः-	३५
(ग)	चक्रन्दमैत्र्यकन्यकावदाने-	३५

पाठ्यग्रन्थौ-

१. **अभिधर्मकोषः** (१-२ कोषस्थाने) ।

